Postal Regd.No. GAMC- 1553/2019-2021
ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १३ अङ्क : १५५
ऍप्रिल - २०१९

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### आस्वादनीया खलु शुकसप्ततिः

पञ्चतन्त्रं, हितोपदेशः, कथासरित्सागरः इत्यादयः अनेके ग्रन्थाः विचित्राभिः कथाभिः रसिकानां चित्तं रञ्जयन्ति । भाषाशैली, रसोत्पत्तिः, नीतिः इत्यादिभिः गुणविशेषैः पञ्चतन्त्रं विदेशेषु अपि प्रसिद्धिं प्राप्नोत् । अथ अधस्तनीं कण्डिकां पठन्तु भवन्तः-

"अस्ति चन्द्रपुरं नाम नगरम् । तत्र विक्रमसेनो नाम राजा बभूव । तस्मिन्नगरे हरिदत्तो नाम श्रेष्ठी । तस्य भार्या शृङ्गारसुन्दरीनाम्नी । तत्पुत्रो मदनविनोदनामा बभूव । तस्य पत्नी प्रभावती । सा सोमदत्तश्रेष्ठिनः कन्या ।"

उपरितनी कण्डिका शुकसप्ततिनामकात् कथासङ्ग्रहात् उद्धृता । पञ्चतन्त्रेण सह शुकसप्ततेः तुलनया ज्ञायते यत् पञ्चतन्त्रस्य भाषायाः अपि शुकसप्ततेः भाषा सरलतरा । शुकसप्ततेः कर्तृत्वं सन्दिग्धं वर्तते । तथापि अस्याः परिष्कृततरं संस्करणं तु चिन्तामणिभट्टनामकेन कृतम् इति प्रतीयते । क्रि.श. १०८८ तः ११७२ पर्यन्तं जीवितवता हेमचन्द्रेण स्वीये ग्रन्थे शुकसप्ततेः उल्लेखः कृतः अस्ति इत्यतः अयं ग्रन्थः तत्पूर्वं, नाम दशमशताव्द्याः आम्भे विरचितः स्यात् इति विद्वद्भिः तर्क्यते । पञ्चतन्त्रम् इव शुकसप्ततिः अपि अनेकाभिः भाषाभिः अनूदिता अस्ति ।

नाम एव यथा सूचयति तथा एषः ग्रन्थः शुकेन उक्तानां सप्ततेः कथानां सङ्ग्रहः अस्ति । पञ्चतन्त्रम् इव अयमपि ग्रन्थः गद्यपद्यमयः । तत्रापि प्रायः गद्यभागस्य एव आधिक्यम् । यथा पूर्वम् उक्तं तथा, सरला भाषा एतस्य ग्रन्थस्य आद्यं वैशिष्ट्यम् । अल्पसन्धिसहितैः अपि कैश्चिदेव पदैः विरचितैः वाक्यैः कथां निरूपितवान् अस्ति अत्र कृतिकारः । किन्तु 'सेवन्तु, सहामि, पतिना, पतौ, अनुत्पाटयित्वा, आकारयित्वा' इत्यादयः अनेके अपाणिनीयाः प्रयोगाः ग्रन्थे तत्र तत्र दृश्यन्ते । प्रसिद्धेषु शब्दकोषेषु अविद्यमानाः मोटा, पारडी, रावडी-इत्यादयः शब्दाः अपि दृश्यन्ते । अत्र विद्यमानः 'कर्णावती' शब्दः गुर्जरवासिनां चित्तं निश्चयेन हरिष्यति ।

पञ्चतन्त्रे पशुपक्षिसम्बद्धाः कथाः अधिकाः । अत्र न तथा । पञ्चषाः एव तादृश्यः कथाः सन्ति । अन्याः सर्वाः अपि सामान्यजनानां कथाः । राजा, मन्त्री, पुरोहितः इत्यादयः उत्तमप्रकृतयः यथा तथैव श्रेष्ठी, रथकारः, कृषिकः, नापितः, चोरः, ग्रामणी सेनाध्यक्षः इत्यादयः अपि कथासु प्रधानभूमिकासु सन्ति । प्रतिकथम् अपि नायिका अन्या वा कुलटा अस्ति एव अतः एव जारः, उपपतिः वा अपि अस्ति । तत्र तत्र गणिकाः अपि सन्ति । एवं सत्यपि ग्रन्थस्य पार्यन्तिकं तात्पर्यं तु चारित्र्यरक्षणे एव ।

( अनुसन्धानम् ५ पृष्ठे )

# उत्तमः वैद्यः



वल्लभपुरस्य निवासी रमेशः प्रसिद्धः वैद्यः । जनाः अपि एतम् अद्वितीयं मन्यन्ते स्म वैद्यशास्त्रे । सः वैद्यः सन्तानहीनः । सः स्वकीयां विद्याम् अन्यं बोधयितुम् इच्छति । किन्तु तस्य विश्वासः आसीत् यत् अध्ययने नितरां श्रद्धा, आसक्तिः च यस्मिन् भवति स एव बोधनाय अर्हः इति।

कदाचित् रमेशस्य बन्धुः कश्चित् कमलनामकः पुत्राभ्यां सह वैद्यं द्रष्टुम् आगतः । सः नगरे रत्नवणिक् आसीत् । आ केभ्यश्चित् दिनेभ्यः कश्चन रोगः तं बाधते स्म । अत एव चिकित्सार्थं सः अत्र आगतः । तस्य पुत्रौ धनञ्जयराघवौ वैद्यवृत्तौ आसक्तिं प्रदर्शितवन्तौ।

रमेशः स्वचिकित्सया सप्ताहाभ्यन्तरे एव कमलस्य रोगस्य तीव्रतां न्यूनीकृतवान् । अनेन सन्तुष्टः कमलः प्रस्थानात् पूर्वं रमेशं प्रशंसन् – "भवान् साक्षात् धन्वन्तरिः एव किन्तु भवता सहैव भवति विद्यमानं प्रावीण्यम् अपि विनष्टं न भवेत्" इति उक्तवान्।

तदा रमेशः – "मया किं कर्तुं शक्येत ? यस्मिन् वैद्यशास्त्रे श्रद्धा अस्ति तादृशम् एव अहं बोधयितुम् इच्छामि" इति उक्तवान्।

तदा कमलः– "मम पुत्रयोः उभयोरपि अस्मिन् शास्त्रे अभिरुचिः अस्ति। एतौ ऊभौ अपि भवान् शिष्यत्वेन स्वीकरोतु" इति सविनयम् अवदत्।

रमेशः – "अहम् एतौ परीक्ष्य स्वनिर्णयं श्रावयामि" इति उक्तवान्। तेन सन्तुष्टः कमलः नगरं गतः।

तयोः मध्ये धनञ्जयः बुद्धिमान्, विषयं झटिति अवगन्तुं समर्थः च। राघवः तु शान्तमनस्कः। सर्वं विषयं सः द्विवारं श्रुत्वा एव अङ्गीकरोति। रमेशः दश दिनानि यावत् तौ उभौ अपि सस्यानां मूलिकानां वनौषधस्य च वैशिष्ट्यं बोधितवान्। चिकित्साक्रममपि अवगन्तुं सूचितवान्।

एकदा रमेशेन वार्ता प्राप्ता यत् पार्श्वग्रामस्य भूस्वामी नितराम् अवस्थः इति। भूस्वामिना सेवमानः आहारः जीर्णः न भवति। अनेन सः बहु शक्तिहीनः जातः आसीत्। एतां वार्तां यः आनीतवान् तमेव रमेशः भूस्वामिनः विषये इतोऽपि कांश्चन प्रश्नान् पृष्टवान्। तेन रमेशेन ज्ञातं यत् भूस्वामी अजीर्णरोगपीडितः इति। सः भूस्वामिनः चिकित्सां कर्तुं धनञ्जयं सूचितवान्। धनञ्जयस्य प्रस्थानात् पूर्वम् अजीर्णरोगनिमित्तं कीदृशस्य औषधस्य उपयोगः करणीयः इत्येतम् अंशम् अपि उक्त्वा प्रेषितवान्।

दिनद्वयं यावत् गुरोः वचनानुसारमेव औषधं निर्माय भूस्वामिनं चिकित्सितवान् धनञ्जयः । तेन दत्तस्य औषधस्य स्वीकारात् भूस्वामी अपि किञ्चिदिव स्वस्थः जातः किन्तु अल्पे समये एव पुनरपि सः पूर्वतनेन एव रोगेण पीडितः अभवत्। अस्य कारणम् अजानन् धनञ्जयः किं करणीयम् इति अज्ञात्वा प्रत्यागतः।

राघवः भूस्वामिनः चिकित्सार्थं गुरोः अनुमतिं प्रार्थितवान्। रमेशेन अनुमतिः दत्ता। तत्र गतः राघवः प्रथमं भूस्वामिना स्वीक्रियमाणम् आहारं परीक्षितवान्। तस्य आहारे घृतस्य तैलस्य च उपयोगः अधिकः आसीत्। तस्य परिशीलनात् दोषः कुत्र अस्ति इति राघवः ज्ञातवान् एव।

सः भूस्वामिनम् उक्तवान् – "महोदय ! आहारविषये पथ्यम् आवश्यकम्। दश दिनानि यावत् भवान् तिन्त्रिणीरसेन, मथितेन तक्रेण वा सह भोजनं करोतु। तदा एव गुरुणा दत्तम् औषधं फलकारि स्यात्" इति। भूस्वामी तस्य वचनम् अङ्गीकृत्य तथैव आचरितवान्। सप्ताहाभ्यन्तरे एव तस्य रोगः उपशान्तः। भूस्वामी राघवाय उपायनानि दत्त्वा प्रेषितवान्।

राघवः यदा प्रत्यागतः तदा रमेशः गृहे न आसीत्। धनञ्जयः राघवात् सर्वं विषयं ज्ञातवान्। सायं यदा रमेशः गृहं प्रत्यागतः तदा धनञ्जयः– "गुरुवर्य ! राघवेण दत्ता चिकित्सा मया ज्ञाता। जीरिका, मरीचः, गुडः इत्येतैः निर्मितं कषायं सः दत्तवान्। अहमपि भवतः वचनानुगुणमेव तमेव कषायं तस्मै रोगिणे दत्तवान् आसम्। किन्तु अहं सफलः न जातः। किमर्थम् एवं जातम् ?" इति आश्चर्येण पृष्टवान्।

तदा रमेशः हसन् उक्तवान् – "रोगी यथा वैद्येन परीक्ष्यते तथा रोगोऽपि परीक्षणीयः। तेन रोगस्य मूलं कारणं ज्ञातव्यम्। सः भूस्वामी अधिकम् आहारं सेवते। एतादृशे प्रसङ्गे औषधात् अपि पथ्यमेव अधिकलाभकारि। एतत् ज्ञातवान् राघवः तत्र सफलः सञ्जातः" इति।

परेद्यवि तौ उभौ अपि वनं प्रति गतौ मूलिकासङ्ग्रहणाय। तदा कस्यचन वृक्षस्य अधः कश्चित् मूर्च्छितः सन् पतितः ताभ्यां दृष्टः। तस्य वेषभूषादिकम् एव सूचयति स्म यत् एषः नितरां दरिद्रः इति। अतः धनञ्जयः – "एषः कोऽपि भिक्षुकः स्यात्। बुभुक्षया मूर्च्छितः इति मन्ये। गच्छाव तावत्। आवां यदर्थम् आगतौ तत् कार्यं समापयाव" इति राघवम् उक्तवान्।

"यदर्थम् आवाम् आगतौ तत् कार्यं तु कुर्वः एव। किन्तु एतम् एतादृश्यां स्थितौ परित्यज्य गमनं न उचितम्" इति वदन् राघवः पतितस्य मुखे जलसेचनं कृतवान्। तदा सः सचेतनः जातः।

ततः राघवः– "धनञ्जय ! एतं गृहं नीत्वा भोजयाव। तदा एतदपि ज्ञायते यत् बुभुक्षाकारणात् एव एषः मूर्च्छितः उत अन्यरोगकारणात् इति। गुरुणा एषः परीक्षणीयः" इति वदन् तं गुरुसमीपम् आनीतवान्।

रमेशः सर्वं वृत्तान्तं ज्ञात्वा धनञ्जयं बोधितवान् – "असहायानां , रोगिणां च विषयेवैद्येन दया प्रदर्शनीया। रोगिणाम् आर्थिकपरिस्थितिं ज्ञात्वा तेभ्यः धनं स्वीकरणीयम्। रोगिणः अस्माकं मित्राणि इति सम्भाव्य एव वैद्याः चिकित्सां कुर्युः। तदा एव वैद्येन उन्नतं स्थानं प्राप्तुं शक्यते" इति।

गुरोः वचनं श्रुतवतः धनञ्जयस्य मुखं विवर्णं जातम्। तेन उक्तं – "क्षन्तव्यः अहम्। वैद्यत्वं प्राप्य अधिकं धनं सम्पादनीयम् इति मम इच्छा आसीत्। किन्तु इदानीं मया ज्ञातं यत् वाणिज्यमेव अधिकस्य धनस्य सम्पादनाय योग्या वृत्तिः इति। वैद्यवृत्तिः मह्यं न रोचते। अहं गृहं गन्तुम् इच्छामि" इति। ततः सः स्वगृहं प्रतिगतः।

राघवः रमेशस्य शिष्यः भूत्वा वैद्यशास्त्रं सम्यक् अधीत्य गुरोः अपि उत्तमः वैद्यः इति यशः प्राप्तवान्।

# सरस्वतीपूजा

डो. सुरेश्वरः झा



सरस्वती = वागधिष्ठात्री देवी । पूजा = आराधना । सरस्वत्याः पूजा = सरस्वतीपूजा ।

सरः (ज्ञानस्रोतः, जलस्रोतो वा) अस्ति अस्याः इत्यर्थे 'सरस्'-शब्दात् 'मतुप्' प्रत्यये कृते, मतुबन्तात् स्त्रीत्वविवक्षायाम् (उगितश्च इति) ङीपि 'सरस्वती' शब्दः निष्पद्यते।

अस्य शब्दस्य प्रयोगः नद्यर्थे आसीत् । किन्तु विद्यादेव्यर्थे अपि अस्य प्रयोगः ऋग्वेदकालादेव प्रसिद्धिं गतः । पश्चिमोत्तरभारते सरस्वतीनाम्नी नदी प्रसिद्धा आसीत्। कालिदासो विश्वमान्यो महाकविः लिखति-

हित्वाहालाम् अभिमतरसां रेवतीलोचनाङ्कां
बन्धु-प्रीत्या समर-विमुखो लाङ्गली याः सिषेवे।
कृत्वा तासाम् अधिगममपां सौम्य सारस्वतीना-
मन्तःशुद्धस्त्वमसि भविता वर्णमात्रेण कृष्णः ॥ (पू.मे. ४९)

अत्र सैव नदी सङ्केतिता। अस्या एव गुप्तं स्रोतः प्रयागे मन्यते। तद्योगादिव 'त्रिवेणी' इत्यभिधीयते। परन्तु दर्शनं तत्र गंगायमुनयोरेव भवति। इत्थञ्च 'नदी' अपि सरस्वती नाप्रसिद्धा। इयम् 'अफगानिस्तानवर्तिन्या 'हरक्वैति' इति नद्या समाना इत्यपि बहवो वदन्ति । परन्तु वाग्देवता-रूपिण्याः सरस्वत्याः वर्तमान-विवरण-विषयतांगतायाः अधिका प्रसिद्धिरितिनिर्विवादम्।

अस्याः औपचारिकी वार्षिकी पूजा अज्ञातचिरकालात् भारते प्रचलिता वर्तते। मकरस्थे रवौ माघे मासे शुचौ पक्षे पञ्चम्यां सरस्वत्याः पूजा प्रत्यब्दम् अनुष्ठीयते।

कतिषुचन वैयक्तिकसद्मसु, बालविद्यालयेषु, मध्यविद्यालयेषु उच्चविद्यालयमहाविद्यालय-विश्वविद्यालयच्छात्रावासादिषु अस्याः पूजा महता वैभवेन, विविध-नृत्य-गीत-वाद्यादिभिः प्रभूतैः फलाद्युपहारैश्च आचर्यते।

अनेके जनाः आमन्त्र्यन्ते । आमन्त्रितानां स्वागतसत्कारादौ महान् आयासो विशेषतश्छात्रा वासादौ विधीयमानोऽलोक्यतेतराम्।

सरस्वत्याः मृण्मयीं प्रतिमां प्रतिष्ठाप्य चित्रं वा संस्थाप्य शास्त्रोक्तविधिना पूजाविधीयते। उपासकाः स्तवैः देवीं पुष्पस्तवकैश्च सम्मानयन्ति। मध्याह्नात् परं प्रसादवितरणेन गीतनृत्यादिभिश्च समयोऽतीव शोभासम्पन्नो विधीयते। निशामुखे स्तुत्यादयः क्रियन्ते, तदनु च अनेकत्र अनेकानि रूपकाणि अभिनीयन्ते। अपरेद्युः विसर्जनं कृत्वा प्रतिमाया जलप्रवाहः क्रियते।

अद्यत्वे पूजाया रूपम् बहुत्र विकृतम् सञ्जातमस्ति । विविधाडम्बरैः पूजायाः वास्तविकं रूपम् आच्छन्नं कृतम् भवति । यत्र तत्र अश्लीला अपि व्यवहाराः पूजावसर-प्रतीपाः भवन्ति इति श्रूयते । तदेतद्ःखावहम्

अवगमनीयम्। पूजाविधिः एतावता दूषितः क्रियते। लोकानां गतानुगतिकत्वात् एष एव पूजाविधिरिति दुःखदो भ्रमः पाल्यते। एतेन शिशवः कुसंस्कारपात्रतां नीयन्ते।

वस्तुतः सरस्वती वाणीरूपा। अतः समस्तवाङ्मयं तस्याः स्वरूपम्। तस्य तस्याः स्वरूपस्य यथावसरम् प्रतिदिनमनुचिन्तनम् एव सरस्वत्याः वास्तविकी पूजा अज्ञानान्धाकारनाशिनी ज्ञान-प्रकाश-पुञ्जप्रदायिनी ऐहिकामुष्मिक-सुखशान्तिसम्पादयित्री बोद्धव्या। माघ-शुक्लपञ्चम्यां तु तदाराधनस्य वार्षिकोत्सवाचरणम् इति मन्तव्यम्। नहि सर्वेष्वन्येषु दिनेषु प्रतोली-विहार-शीलस्य अनधीयानस्य केवलं वसन्तपञ्चम्यां 'डिस्को-डान्स', इत्यनेन पुष्प-फलापूपनिचयैश्च सरस्वती प्रसीदेत् शतेन, सहस्रेण, लक्षेण कोट्या एव वा कथन्न पूजिता भवतु। अतः "प्रतिदिनं विद्याभ्यासो मनोयोगेन करिष्यते" इति सङ्कल्पेन सह आडम्बरविरहितम् अश्लीलताशून्यम् गर्वाहङ्कार-विवर्जितम् हृद्य-सात्त्विकि-भावनाभरितम् स्वजन संघसंयुतम् अनुद्वेजकाचरणाभरणं वाग्देवताराधनं करणीयम्। स्वस्था मर्यादिता च पूजापरम्परा सरस्वती-देवी-चरणानुचिन्तन-प्रधाना संरक्षणीया इति।

### आस्वादनीया खलु शुकसप्ततिः

मदनविनोदः नाम कश्चित् श्रेष्ठिपुत्रः यदा प्रवासार्थं गच्छति तदा तस्य भार्या प्रभावती दुष्टसख्या प्रेरिता सती परपुरुषरमणाय गन्तुं सन्नद्धा भवति। तदा त्रिविक्रमभट्टेन दत्तः नीतिशास्त्रकोविट शुकः तां निवारयन् कुतूहलकारिणीं काञ्चित् कथां कथयति। किन्तु सः अपूर्णाम् एव कथां कथयति। प्रभावत्या पृष्टे सति 'यदि भवती न अद्य गच्छति तर्हि अग्रे कथयामि' इति समयं कल्पयति। कथाश्रवणकुतूहलिनी सा तत् अङ्गीकृत्य तथैव तिष्ठति। अनेन क्रमेण शुकः तां सप्ततिं दिनानि यावत् परपुरुषरमणप्रयासात् निवारयति। तावता तस्याः पतिः प्रत्यागच्छति। प्रभावत्याः चारित्र्यं रक्षितं भवति।

शृङ्गारप्रधानः अयं ग्रन्थः रसिकजनानां कुतूहलं पूरयितुं समर्थः इति सत्यं, किन्तु भद्रजनैः अपि एतस्य पठनं सर्वथा त्याज्यं नास्ति। यतो हि पुरातनकाले कामान्धाः युवयुवतयः बन्धं मोक्षं च कथं प्राप्नुवन्ति स्म इत्यपि अस्माभिः ज्ञातव्यं खलु!

## ज्ञानसरिता

**सूर्यशक्तिः हिमखण्डं द्रावयितुम् असमर्था** – सूर्यस्य अपारा शक्तिः भवति इति वयं जानीमः एव। आश्चर्यं नाम महती अपि सा सूर्यशक्तिः हिमखण्डं द्रावयितुम् असमर्था भवति इति। सद्यस्सिद्धस्य हिमखण्डस्य उपरि पतितानां सूर्यकिरणानां ९० प्रतिशं भागः प्रतिफलितः भवति। अतः एव द्रवीकरणाय यावत् औष्णयम् आवश्यकं तावत् तस्मिन् सङ्क्रामयितुं न शक्नुवन्ति ते। भवन्तः कदाचित् पृच्छेयुः – सूर्यकिरणकारणतः हिमस्य द्रवीभवनं दृश्यते खलु इति। वस्तुतः तस्य द्रवत्वस्य कारणं भवति – समुद्रीयः वायुः।

आत्मनः उपरि पतितानां सूर्यकिरणानाम् उष्णतायाः २/३ भागं यद्यपि हिमखण्डः अधिगृह्णाति, तथापि तदीयस्य द्रवता तु न सिध्यति। बहूनां हिमपटलानां भेदनं करणीयं भवति उष्णतया। किन्तु तावतां पटलानां भेदनपुरस्सरं द्रवार्हतां सम्पादयितुम् असमर्थः भवति सूर्यतापः। अतः एव सूर्यकिरणेषु पतितेषु अपि हिमखण्डः द्रवतां न याति।

## कृपया हसन्तु

निमिषा चुडासमा

कश्चन नेता ग्रामं गत्वा ग्रामजनान् - "काः समस्याः सन्ति ? कृपया मां सूचयन्तु" इति अपृच्छत् । कश्चन ग्रामजनः - "महोदय ! ग्रामे चिकित्सकः नास्ति" इति असूचयत् । नेता दूरवाण्या वार्तालापं कृत्वा - "चिकित्सकः शीघ्रमेव आगमिष्यति" इति अवदत् । ततः सः पुनः अपृच्छत् - "अन्या कापि समस्या ?" तदा द्वितीयः ग्रामजनः अवदत् - "हे नेतः, एका महत्त्वपूर्णा समस्यास्ति यत् अस्माकं ग्रामे दूरवाणीयन्त्रस्य 'नेटवर्क' नास्ति ।"

★ ★ ★ ★ ★

कश्चन आङ्ग्लजनः मार्गे आरक्षकं पृष्टवान् 'Will you please guide me to the way to the bus stand?' इति । आरक्षकः तस्य भाषां न ज्ञातवान् अतः सः उत्तरं न दत्तवान् । आङ्ग्लजनः अन्यम् आरक्षकम् अपि पृष्टवान् किन्तु सः अपि भाषां न ज्ञातवान् अतः सोऽपि उत्तरं न दत्तवान् । अतः आङ्ग्लजनः ततः निर्गतवान् ।

एतत् दृष्ट्वा प्रथमः आरक्षकः द्वितीयम् आरक्षकम् उक्तवान् - "आङ्ग्लभाषायाः ज्ञानम् आवश्यकम् अस्ति ।" एतत् श्रुत्वा- "एषः आङ्ग्लजनः आङ्ग्लभाषां जानाति तथापि कोऽपि तस्य सहयोगं कर्तुं शक्तवान् ?" इति उक्तवान् द्वितीयः आरक्षकः ।

## अहो चातुर्यम्

– संस्कृतविकिपिडीयाजालस्थानात्

**घटं भिन्द्यात् पटं छिन्द्यात् कुर्यात् रासभरोहणम् ।**
**येन केन प्रकारेण प्रसिद्धः पुरुषो भवेत् ॥**

तार्किकाः सदापि 'घटः' 'पटः' 'रासभः' – इत्यादीन् शब्दान् एव उच्चारयन्तः भवन्ति उदाहरणावसरे । अतः कश्चित् तान् उपहसन् वदति – 'घटः भेत्तव्यः, पटः छेत्तव्यः, रासभः आरोढव्यः वा । केनचित् उपायेन प्रसिद्धिप्राप्तिः चिन्तनीया' इति । अद्य जनाः एतदेव कुर्वन्तः दृश्यन्ते । प्रसिद्धिप्राप्त्यर्थं विलक्षणान् अर्थहीनान् उपायान् आश्रयन्तोऽपि ते न लज्जन्ते ।

**त्रिविक्रमोऽभूदपि वामनोऽसौ स सूकरश्चाटपि स वै नृसिंहः ।**
**नीचैरनीचैरतिनीचनीचैः सर्वैरुपायैः फलमेव साध्यम् ॥**

'येन केन प्रकारेण प्रसिद्धपुरुषो भव' इति तु अद्यतनः मन्त्रः । प्रसिद्धिप्राप्तिकाले धनसम्पादनकाले च न्याय्यान्यायस्य चिन्ता उचितानुचितविवेचनं वा न क्रियते अद्य । एतत् अनुचितं न इति वदति कश्चन चाटुश्लोककारः । सः भगवन्तं महाविष्णुं दर्शयन् वदति – 'विष्णुः इष्टसाधनार्थं क्वचित् त्रिविक्रमः जातः, पुनरन्यदा वामनः । वराहावतारः तेन आश्रितः, मत्स्यकूर्माद्यवताराः अपि अवलम्बिताः । नृसिंहः अपि जातः सः । एवं केनचित् प्रकारेण तेन इष्टं साधितम् । इष्टसाधनकाले उपायस्य नीचानीचता मनसि न स्थापनीया' इति । कालोचितः खलु अस्ति अयं मन्त्रः !!

# ज्ञानसरिता

### काकाः अपि बुद्धिमन्तः एव



पक्षिषु आधिक्येन सर्वत्र दृश्यमानाः तु काकाः एव । काकः आ सहस्रशः वर्षेभ्यः अस्माभिः सहैव जीवति । तथापि तस्मिन् अस्माकं कुतूहलम् आदरः वा नाधिकम् । किन्तु एषु दिनेषु प्रवृत्तानि संशोधनानि ज्ञापयन्ति यत् काकानां बुद्धिमत्ता न क्षीणा इति।

विज्ञानिभिः परिलक्षितम् अस्ति यत् नेफ्तलिन्गुलिकानाम् उपरि नृत्यम् इच्छन्ति काकाः इति । तस्यां गुलिकायां स्थिताः रासायनिकांशाः काकपादस्थान् परावलम्बिनां कीटानां निवारणे उपकुर्वन्ति । प्रसिद्धः जीवशास्त्रज्ञः बर्नहार्ड्ग्झिमेकः वदति यत् केचन काकाः अग्निशलाकायाम् अग्नियोजनं ज्ञातवन्तः दृष्टाः मया इति । ते काकाः अग्नियुक्ताः शलाकाः पक्षयोः अधः धरन्ति । एतत् किमर्थम् इति तु तेन न ज्ञातम् । काकाः गुरुत्वशक्तेः उपयोगं सम्यक् एव कुर्वन्ति । आहारत्वेन प्राप्तानां बीजादीनाम् आवरण्यस्य भङ्गे यदा असमर्थता भवति तदा ते तानि बीजानि उन्नतस्थलं प्रति नीत्वा अधः पातयन्ति । एतादृशं सर्वं कुर्वन्तः काकाः किं बुद्धिमन्तः न ?

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **शुकः** | तोता | a parrot |
| **शुक्तिः** | सीप | an oyster |
| **शुचः** | शोक | grief |
| **शुनकः** | कुत्ता | a dog |
| **शुल्वम्** | तांबा | copper |
| **शुश्रूषकः** | सेवा करने वाला | an attendant |
| **शुषः** | सूखना | drying |
| **शूकरः** | सूअर | a hog |
| **शृगालः** | सियार | a jackal |
| **शृङ्गम्** | सींग | horn |
| **शेखरः** | कलंगी | a crest |
| **शेमुषी** | बुद्धि | intellect |
| **शैघ्रयम्** | जल्दबाजी | quickness |
| **शैत्यम्** | ठंढक | coldness |
| **शैथिल्यम्** | ढीलापन | slackness |

## किं भवन्तः जानन्ति ?

**१ ) महाभारतयुद्धं कदा अभवत् ?**

(क) द्वापरयुगे (ख) त्रेतायुगे (ग) कलियुगे (घ) सत्ययुगे

**२ ) दुष्यन्तशकुन्तलयोः विवाहप्रकारः कः आसीत् ?**

(क) आसुरः (ख) राक्षसः (ग) गान्धर्वः (घ) प्राजापात्यः

**३ ) हस्तिनापुरे राजकुमारेभ्यः शस्त्रशिक्षणाय द्रोणं कः नियुक्तवान् ?**

(क) भीष्मः (ख) धृतराष्ट्रः (ग) पाण्डुः (घ) सत्यवती

**४ ) कौरवपाण्डवादयः कस्य वंशस्य आसन् ?**

(क) यदु (ख) सूर्य (ग) चन्द्र (घ) भृगु

**५ ) राज्ञः पाण्डोः मृतदेहेन सह का 'सती' अभवत् ?**

(क) कुन्ती (ख) माद्री (ग) गान्धारी (घ) सुदेष्णा

**६ ) एतेषु कः अर्जुनं हन्तुं प्रतिज्ञामकरोत् ?**

(क) कर्णः (ख) भीष्मः (ग) दुर्योधनः (घ) एकलव्यः

**७ ) धृतराष्ट्रपुत्रेषु कः ज्येष्ठः आसीत् ?**

(क) युयुत्सुः (ख) विकर्णः (ग) दुर्योधनः (घ) दुःशासनः

उत्तराणि – (१) क (२) ग (३) क (४) ग (५) ख (६) क (७) ग

# अस्माकम् आगामिकार्यक्रमाः

## ग्रीष्मवर्गः

**06/05/19 to 16/05/19**

### बालसंस्कृतशिबिरम् (Cl. 9)

**10:00am to 11:30am, Daily**

### मार्गदर्शनम् व्याकरणम् (Cl.10)

**08:00am to 09:30am, Daily**

- **Venue :** Eklavya Sanskrit Academy
  Core House,
  Opp. Apollo city centre
  Nr. Parimal Garden,
  Ahmedabad - 380006
- **Contact:** Dr. Mihir Upadhyay,
  Mobile: 98246 16237

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

## Admission Open

**Value Education Through Sanskrit**

### बालसंस्कारकेन्द्रम्

**(Class SKg to 4)**

**Date** : 16/6/19 to 12/4/20
**Day** : Sunday
**Time** : 11.00am to 12.30pm
**Fees** : 4500/-

### बालसंस्कृतवर्गः

**(Class 5 to 8)**

**Date** : 16/6/19 to 12/4/20
**Day** : Sunday
**Time** : 11.00am to 12.30pm
**Fees** : 4500/-

**Venue:** Core House, Off CG Road, Ah'bad
**Contact :** Dr. Mihir Upadhyay - (91) 098246 16237

संस्कृत-
### साम्प्रतम्

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू - 100
द्वैवार्षिकं रू - 175
त्रैवार्षिकं रू - 250
अङ्कमूल्यं रू - 10

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006